Gyanshauryam, International Scientific Refereed Research Journal
© 2019 GISRRJ | Volume 2 | Issue 3 | ISSN : 2582-0095

# बौद्धेतर-प्रमाणानाम् बौद्धप्रमाणयोः अन्तर्भावः

**डॉ. प्रदीपकुमारद्विवेदी**
बौद्धदर्शनविभागः, राष्ट्रियसंस्कृतसंस्थानम्, एकलव्यपरिसरः, अगरतला, त्रिपुरा।

**सारांशः**- बौद्धन्यायपरम्परायां द्वयोः प्रमाणयोः चर्चा वर्तते– प्रत्यक्षप्रमाणम् अनुमानप्रमाणञ्च। प्रत्यक्षप्रमाणस्य चत्वारो भेदाः सन्ति– इन्द्रियप्रत्यक्षम्, मानसप्रत्यक्षम्, स्वसंवेदनम्, योगिज्ञानञ्च। अनुमानप्रमाणस्य द्वौ भेदौ स्तः – स्वार्थानुमानम् परार्थानुमानञ्च। बौद्धेतरः, वैदिकन्यायपरम्पराद्वारा प्रत्यक्षानुमानप्रमाणाभ्यामतिरिक्तं शब्द–उपमान–अर्थापत्ति–अभाव–सम्भव–एतिह्यादिप्रमाणानि स्वीक्रियते। परन्तु, बौद्धदार्शनिकाचार्यशान्तिरक्षितेन तत्त्वसङ्ग्रहः नामके ग्रन्थे उपरोक्तः सर्वाणि प्रमाणानि पूर्वपक्षे स्थाप्य, बौद्धसिद्धान्तानामाधारे खण्डनं क्रियते। आचार्यशान्तिरक्षितस्य मतं वर्तते यत् शब्द–उपमान–अर्थापत्ति–अभाव–सम्भव–एतिह्यादिप्रमाणां समायोजनं प्रत्यक्षानुमानप्रमाणयोः एव सञ्जायते, अतः अन्येषां प्रमाणानामावश्यक्तैव नास्ति। शोधपत्रेऽस्मिन् बौद्धेतर अन्येषां प्रमाणानां द्वयोः प्रमाणयोः अन्तर्भावविषयकी चर्चा वर्तते।

**मुख्यशब्दः** – प्रमाणानि, बौद्धदर्शनाचार्यः, शान्तरक्षितः, बौद्धदार्शनिकाः, वैशेषिकाः,दार्शनिकाः।

---

अचार्यधर्मकीर्तिना लिख्यते– सम्यग्ज्ञानं प्रमाणम्। सम्यग्ज्ञानं द्विविधं प्रत्यक्षम् अनुमानञ्च। तत्र प्रत्क्षयं चतुर्विधम्- इन्द्रियप्रत्यक्षम्, मनोविज्ञानम्, आत्मसंवेदनम्, योगिज्ञानञ्च। अनुमानं द्विविधम्– स्वार्थानुमानम् परार्थानुमानम्। एतद् अतिरिक्तं सांख्यदर्शनं प्रत्यक्षम् अनुमानं शब्दप्रमाणञ्च स्वीकरोति। नैयायिकाः प्रत्यक्ष–अनुमान–शाब्द–उपमानप्रमाणञ्च स्वीकुरुवन्ति। मीमांसकाः प्रत्यक्ष–अनुमान–शाब्द–उपमान–अर्थापत्तिप्रमाणञ्च स्वीकुरुवन्ति। वेदान्तदर्शने प्रत्यक्ष–अनुमान–शाब्द–उपमान–अर्थापत्ति–अनुपलब्धिप्रमाणञ्च स्वीकुरुवन्ति।

बौद्धदर्शनाचार्यः शान्तरक्षितः तत्त्वसंग्रहग्रन्थे शब्द–उपमान–अर्थापत्ति–अनुपलब्धिप्रमाणानाञ्च अन्तर्भावः प्रत्यक्ष–अनुमानप्रमाणयोः एव क्रियते। तस्य संक्षिप्तं विवरणम् प्रस्तूयते मया–

**शब्दप्रमाणस्य अनुमानप्रमाणेऽन्तर्भावः** - बौद्धदार्शनिकाः शब्दप्रमाणम् आगमप्रमाणं वा अनुमानप्रमाणेन प्रमाणं न मन्यन्ते। ते एतयोः प्रमाणयोः अन्तर्भावः अनुमानप्रमाणे एव कुर्वन्ति।1

**शब्दप्रमाणस्य खण्डनम्**- आचार्यशान्तरक्षितस्य मतमस्ति यत् शब्दस्य वाच्यवस्तुना सह न तादात्म्यलक्षणप्रतिबन्धोऽस्ति न च तदुत्पत्तिलक्षणप्रतिबन्धः।2 शब्देन सह अर्थस्य किमपि वास्तविकसम्बन्धो नास्ति, तस्मात् शब्दात् अर्थस्य ज्ञानं न भवितुं शक्यते। धर्मकीर्तिना उच्यते यत् शब्दानां बाह्यार्थेन सह अविनाभावो नास्ति, तस्मात् शब्दात् अर्थस्य ज्ञानं न भवति। शब्दाः तु वक्तुः अभिप्रायस्य सूचकाः भवन्ति।3 वक्तुः अभिप्रायस्य अविसंवादीज्ञानत्त्वात् शब्दस्य प्रामाण्यं स्वीक्रियते, अन्यथा शब्देन सह अर्थस्य किमपि निबन्धनं नास्ति।4 वक्तुः अभिप्राय अर्थात् विवक्षायाः शब्दैः अनुमीयते।

**विवक्षायाः स्वीकारोक्तिः**- आचार्यशान्तरक्षितेन अस्य स्पष्टरूपेण प्रतिपादनं क्रियते यत् सर्वैः वचनैः विवक्षाया एव अनुमीयते। प्रत्यक्षेण अनुपलम्भेन वा शब्दहेतुभिः विवक्षाया एव निश्चितं भवति।5 शब्देन सह विवक्षायाः अन्वयव्यतिरेकः वर्तते।

आचार्यकमलशीलेन उच्यते यत् शब्दैः यदि कस्यापि श्रोतारं वक्तुः विवक्षाः ज्ञानं न भवति तर्हि मात्र शब्द–लिङ्गस्य दोषो नास्ति, अयं तु प्रमाता उपरि निर्भरोऽस्ति यत् सः शब्द–लिङ्गेन वक्तुः विवक्षायाः अनुमानं करोति न वा।6

आचार्यशान्तरक्षितेन शब्दं कार्य–हेतुः तथा विवक्षां साध्य रूपेण स्वीकृत्य तत्र त्रैरूप्यहेतुलक्षणमपि सिद्ध्यते। पुरुषे, प्रदेशविशेषे वा शब्दस्य विद्यमानत्वं, पक्षधर्मत्वं तथा तत्सदृशः सन्ताने विद्यमानत्वं, सपक्षसत्त्वं एवं विवक्षाविहीनपुरुषाद्यां शब्दस्य अविद्यमानत्व, विपक्षासत्त्वमस्ति। अनेन प्रकारेण शब्द–हेतौ त्रैरुप्यलक्षणं स्थापयते।7 धर्मकीर्तिना आप्तपुरुषस्य वचनानि अपि अविसंवादसामान्येन अनुमानप्रमाणमेव स्वीक्रियते।8 दिङ्नागधर्मकीर्तिः आदि बौद्धदार्शनिकानाम् अनुसारं शब्दः पौरुषेयोऽस्ति। ते स्व ग्रन्थेषु, मीमांसकैः प्रतिपादिताः वेदस्य नित्यत्त्वं एवं अपौरुषेयत्त्वस्य विस्तृतं प्रबलञ्च खण्डनं क्रियन्ते। बौद्धाचार्याः मन्यन्ते यत् शब्दैः विवक्षायाः अनुमानं सङ्केतस्य अपेक्षया भवति। शब्दाः बाह्यार्थे सङ्केतितो न वर्तन्ते, तथा असङ्केतिक अर्थस्य शब्देन ग्रहणं न कर्तुं शक्यते। तस्मात् शब्दस्य सङ्केतग्रहणं पुरुषाश्रितो भवति।9 सङ्केतेनैव शब्दाः विवक्षाया अनुमानं कारयन्ति। तस्मात् शब्दज्ञाने सङ्केतभेदेन भेदं दृश्यते।

वैशेषिकाः शब्दस्य अन्तर्भावः अनुमानप्रमाणे समानविधिना क्रियन्ते। यथा लिङ्गदर्शनेन व्याप्तिस्मरणं भवति, तत्पश्चात् अनुमेयार्थस्य ज्ञानं भवति, तथैव शब्देन, सङ्केतस्मरणेन वाच्यार्थस्य ज्ञानं भवति, तस्मात् शब्दप्रमाणम् अनुमानप्रमाणात् भिन्नं नास्ति।10

सारांशोऽयमस्ति यत् बौद्धमते शब्दाः बाह्यर्थस्य अभिधायकाः न भवन्ति, यतोहि तेषां बाह्यार्थेन सह तादात्म्य एवं तदुत्पत्तिरूप प्रतिबन्धो न भवति। ते अन्यापोहेन वक्तुः अभिप्रायस्य अनुमानं मात्रं कारयन्ति। अन्यापोहः अपोहो वा बौद्धदर्शनस्य पारिभाषिकः शब्दोऽस्ति।

अन्यापोहस्यैव संक्षिप्तनाम अपोहः अस्ति। अन्यापोहस्य अर्थोभवति अतद्व्यावृत्तिः इति। अर्थात् तत् पदार्थात् भिन्नस्य व्यावृत्तिः परिहारो वा। यथा गौ शब्दः गौभिन्नस्य अगो इत्यस्य व्यावृत्तिं कृत्वा स्वाभिप्रायः प्रकटयति11 अर्थात् यः यादृशः नास्ति तस्य व्यावृत्तिकरणमेव अन्यापोहो भवति। अन्यापोहस्य सिद्धान्तस्य प्रथमप्रवर्तकः आचार्यदिङ्नाग एव अस्ति। प्रमाणसमुच्चयस्य पञ्चमः परिच्छेदः अपोह्येन सम्बद्धो वर्तते। प्रायेण अपोहस्य स्वरूपं निषेधात्मकम् अभावात्मकं वा भवति। यतोहि अत्र अतद् इत्यस्य निषेधः क्रियते। अतद् इत्यस्य निषेधे कृते सति सः अपोह्य–आधार–वासनादि भेदेन नैकप्रकारको भवति।12

आचार्यशान्तरक्षितेन तत्त्वसंग्रहे सामान्यरूपेण अपोहस्य द्वौ भेदौ प्रतिपादितौ एकः पर्युदास अपरः प्रसज्यश्च। पर्युदास–अपोहोऽपि द्वौ प्रकारकौ भवतः बुद्ध्यात्मा अर्थात्मा च।13 अनयोः बुद्ध्यात्मा पर्युदास एव प्रमुखः अपोह अस्ति। यः बुद्धौ अर्थप्रतिबिम्बरूपेण तिष्ठति। येन प्रकारेण प्रत्यक्षज्ञाने अर्थाकारता भवति तेनैव प्रकारेण बुद्ध्यात्मा–अपोहे अर्थप्रतिबिम्बो भवति।14 अर्थात्मा–पर्युदासरूपः अपोह स्वलक्षण अर्थरूपो भवति यः अन्येन अर्थेन तस्य व्यावृत्तिं बोधयति। प्रसज्यनामकाद् अपोहात् भावस्य अभावरूपे ज्ञानं भवति यथा गो इत्यस्य अर्थो भवति अगो इत्यस्य प्रतिषेधः।15 एषु त्रिप्रकारकेषु अपोहेषु मुख्यरूपेण बुद्ध्यात्मा–अपोह एव शब्दैः प्रतिपाद्यते। शब्देन बुद्धौ अर्थप्रतिबिम्ब उत्पन्नो भवति। यः विकल्पान् अर्थान् अपोह्यति। शब्दाद् उत्पद्यमानत्वात् अपोहरूपः अर्थप्रतिबिम्ब वाच्यो भवति तथा च शब्द वाचको भवति। शब्दान्तरैः शब्दः कारणं भवति तथा च अर्थप्रतिबिम्ब कार्यं भवति।16

साक्षात् शब्दात् जायमानत्वात् प्रतिबिम्बलक्षणः अपोहः मुख्यशब्दार्थो भवति।17 अन्यौ द्वौ अपोहौ गौणरूपेण शब्दार्थः भवतः। अपोहस्य साक्षात् आकारस्य स्पष्टीकरणात् सामर्थ्यबलेन प्रसज्यप्रतिषेधस्यापि ग्रहणं क्रियते यतोहि कस्यापि वस्तुनः स्वरूपं तस्मात् भिन्नवस्तुनः स्वरूपात् भिन्नं भवति तद् भिन्न–भिन्नं इति नियमबलात्।18 यदा शब्दस्य केनापि वस्तुना सह सम्बन्धो भवति तदा विवक्षया व्यावृत्तस्य वस्तुनः ज्ञानमपि भवति। तस्मात् इदमपि प्रतीकात्मकरूपेण शब्दस्य वाच्यार्थः कथ्यते। एतौ द्वौ शाब्दरूपौ अपोहौ साक्षात् न व्यवह्रीयते।19

**उपमानविचारः-** बौद्धदर्शने प्रत्यक्षमनुमानञ्च प्रमाणद्वमेव मान्यं स्तः। ते अभिप्रायस्य निवेदनत्त्वे शब्दप्रमाणं स्वीक्रियन्ते। उपमानप्रमाणं केनापि प्रकारेण नेष्टं बौद्धाचार्यान्। उपमानप्रमाणं नैयायिकाः मीमांसकाश्च स्वीक्रियन्ते। नैयायिक–मीमांसकाभ्यां सादृश्याधारे प्रतिपादितम् उपमानप्रमाणं बौद्धाः निर्विषयकं मन्यन्ते, यतोहि बौद्धाचार्याणां मतानुसारं सादृश्यस्य सत्ता नास्ति। ते

संज्ञा-संज्ञीसम्बन्धो अपि न स्वीक्रियन्ते, तथा पूर्वदृष्टः 'गौ' सादृश्यात् गवयस्य ज्ञानत्वे स्मृतिरपि कार्यं करोति, बौद्धाचार्याः स्मृतिं गृहीतग्राही भूतत्वात् प्रमाणरूपं न मन्यन्ते। अनेन प्रकारेण मीमांसकैः निरूपितम् उपमानप्रमाणस्य प्रमाणिकतायाः निराकरणं स्यात्। सादृश्यात् विशिष्टपिण्डं (वस्तुविशेषं), पिण्डात् विशिष्टसादृश्यं वा मीमांसकाः उपमानस्य विषयः मन्यन्ते, किन्तु सदृश्यवस्तो अतिरिक्तं सादृश्यस्य स्थापनायां ते समर्थो न भवितुं शक्यन्ते यतोहि कस्यापि प्रमाणात् एवं प्रतीतिः न भवति। यथा- यदि सदृश्यवस्तुभिः अतिरिक्तसदृश्यं दृश्यं मन्येत् तर्हि दृश्यस्य अनुपलब्धिदोषो वर्तते, सा मान्यताग्रस्ताः जाताः। यदि तम् अदृश्यं मन्येत् तर्हि तत् सम्बद्धहेतोः अभावे अनुमानेनापि तस्य सिद्धिः कथं भवितुं शक्यते? सादृश्यज्ञानं तु स्वकारणेभ्यः उत्पन्नः सदृश्यवस्तुभिः अपि सम्भवोऽस्ति, अतः सादृश्यज्ञानेन अपि सादृश्यसम्बन्धस्य सिद्धिः युक्तिसङ्गतो नास्ति। यदि अयम् यत् उपमानप्रमाणेनैव सादृश्यस्य सिद्धिः भवति तर्हि इदं कथनमपि सम्यक् नास्ति, यतोहि अन्य कस्यापि प्रमाणेन सिद्ध- सदृश्यः, पिण्डे च विशेषण-विशेष्यभावः तस्मिन् च उपमानस्य विषयता, मीमांसकैः मान्यमस्ति तदा सादृश्यस्यापि सिद्धिः उपमानेन न भवितुं शक्यते।20

**अर्थापत्तिविचारः-** आचार्यशान्तरक्षितः अर्थापत्तिमपि पृथक् प्रमाणरूपे न स्वीकरोति। तस्य मतानुसारं 'अर्थापत्तिः' प्रमाणस्य अन्तर्भाव अनुमानप्रमाणैव भवति, यतोहि तत्र त्रैरूप्यकार्यहेतुः स्थाप्यते। उदाहरणार्थ- 'देवदत्तः पीनो वर्तते, किन्तु दिवा भोजनं न करोति।' अर्थपत्तिप्रमाणेन ज्ञायते यत् सः रात्रौ भोजनं करोति। बौद्धदार्शनिकाः अस्य अन्तर्भावः अनुमानप्रमाणे कुर्वन्ति- विवक्षितदेवदत्तः रात्रिभोजनविशिष्टोऽस्ति- अयं पक्षोऽस्ति। दिवा भोजनात् रहितत्त्वादपि पीनत्वेन-अयं हेतु वर्तते। तद्भिन्नम् अन्यपुरुषाणामिव-अयं दृष्टान्तोऽस्ति। बौद्धदर्शनस्यानुसारं पीनत्व कार्ये, भोजनत्वं कारणमस्ति, अतः अर्थापत्तेः उपर्युक्तोदाहरणं कार्यहेतुना अनुमानप्रमाणैव अन्तर्भूतो जातः।21

**अभावविचारः-** बौद्धदार्शनिकाः अभावमपि पृथक् प्रमाणं न स्वीक्रियन्ते, ते तस्य ग्रहणं प्रत्यक्षैव कुर्वन्ति- **'तस्मादेकोपलब्धिरेवान्यस्यानुपलब्धिरिति नाभावो नाम पृथक् प्रमाणम्, प्रत्यक्षात्'।22** बौद्धदर्शनेऽनुपलब्धिहेतोः अपि अवधारणा अस्ति, यः कस्यापि उपलब्धि- लक्षणयोग्यपदार्थस्य अनुपलब्धिम् अनुमानप्रमाणेन ज्ञापयति।23 अस्य चर्चा अनुमान-प्रमाणप्रकरणेऽपि क्रियते आचार्येण। दार्शनिकाः उच्यन्ते- अभावस्य स्वरूपः एव न प्राप्यन्ते, तदा सः प्रमाणं कथं भवितुं शक्यते? यथा- प्रत्यक्षादि प्रमाणस्य अनुत्पत्तिं मीमांसकाः अभावप्रमाणरूपं स्वीक्रियन्ते।

**शङ्का-** इयं का अनुपपत्तिः? इयं का प्रसज्यवृत्तिना प्रमाणस्य अनुत्पत्तिः मात्र वर्तते? पर्युदासवृत्तिना वा अन्यकेचिद् वस्तु? यदि अन्य वस्तु अपि अस्ति तर्हि सः जडरूपमस्ति, ज्ञानरूपं वा? यदि ज्ञानं वर्तते तर्हि सः किं ज्ञानमात्रमस्ति? कस्यापि वा ज्ञानविशेषेण सम्बन्धितः कस्यापि विषयस्य ज्ञानमस्ति?

**समाधानम्-** एषु विकल्पेषु अभावं प्रसज्यरूपस्वीकारणं सम्यक् नास्ति। सः सर्वशक्तिशून्यत्वेन परिच्छेदकः ज्ञानजनको वा न भवितुं शक्यते। पण्डितचक्रचूडामणि उच्यते यत् अभाव न तु कस्यापि प्रतिपत्तिः (ज्ञानम्) अस्ति, न च कस्यपि प्रतिपतेः हेतुः, अतः अभावस्यापि प्रतिपत्तेः सम्भवो नास्ति। सः जडरूपमपि न भवितुं शक्यते, यतोहि जडपरिच्छेदको न भवितुं शक्यते। जडरूपशकटः घटं परिछिन्नं करोतु, लोकव्यवहारेऽयं न दृश्यते। तं ज्ञानमात्रमपि न मन्तुं शक्यते। यदि ईदृशः मन्यन्ते, तर्हि देशकालस्वभावेन च दूरस्थ वस्तूनि, यथा- सुमेरुशंखपिशाचादेः अपि ज्ञानमात्रेण अभावप्रमाणेन अभावः स्यात्। यदि एकेन ज्ञानेन सम्बन्धितो भूतलादि वस्तोः ज्ञानमेव अभाव इत्युच्यते तर्हि प्रत्यक्षविशेषस्य 'अभावः' इति नामकरणं स्यात्। अनेन इदं निश्चीयते यत् प्रमाणद्वयमेवास्ति - प्रत्यक्षमनुमानञ्च।24

**सम्भवविचारः-** समुदायव्यवस्थायाः हेतुः समुदायी एव भवति, यथा- सहस्रादि कार्यं शतादि कारणेन भवति।25

कुमारिलेनापि सम्भवप्रमाणस्य उल्लेखं कृतमस्ति, यत् पौराणिकैः 'सम्भवो' नामकप्रमाणं स्वीक्रियन्ते। कुमारिलेन इदं प्रमाणं अनुमानस्यान्तर्गतं स्वीक्रियन्ते।

**ऐतिह्यादिविचारः-** ऐतिह्यप्रमाणस्य कथने (इदं वटवृक्षे यक्ष विद्यते) सत्यतायाः निर्णयो न भवितुं शक्यते, तस्मात् इदं प्रमाणं नास्ति। अतिशयप्रसंगत्वेन प्रमाणत्वं न स्यात्, अन्यथा स्वप्नावस्थायां सत्यतायाः अदर्शनेनापि प्रमाणं स्यात्।**26**

मीमांसकाचार्यकुमारिलेनापि अस्योल्लेखं कृतम्। अनेन प्रकारेण आचार्येण शान्तिरक्षितेन शब्द-उपमान-अर्थापत्ति-अभाव-सम्भव-एतिह्यादिप्रमाणां समायोजनं प्रत्यक्षानुमानप्रमाणयोः एव क्रियते।

**सन्दर्भः**


1. न प्रमाणानतरं शब्दमनुमानम् तथा हि सः। (तत्त्वसंग्रहपञ्जकि, का. सं. -1514)

2. हि वाच्यैर्वस्तुभिः सह कश्चित् तादात्म्यलक्षणः तदुत्पत्तिलक्षणो वा प्रतिबन्धो वचसामस्ति।
(तत्त्वसंग्रहपञ्जकि, का. सं. - 1512)

3. नान्तरीयकता भावाच्छब्दानां वस्तुभिस्सह।
नार्थसिद्धिस्ततस्ते हि वक्त्रभिप्रायसूचकाः। (प्र.वा. 3.213-214)

4. शाब्देऽप्यभिप्रायनिवेदनात्। प्रमाण्यं तत्र शब्दस्य नार्थतत्त्वनिबन्धनम्। (प्रमाणवार्तिकम्-1.3-4)

5. वचोभ्यो निखिलभ्योऽपि विवक्षैषानुमीयते।
प्रत्यक्षानुपलम्भाभ्यां तद्हेतुः सा हि निश्चिता।। (तत्त्वसंग्रहः, का. सं. - 1514)

6.ये पुनस्तासु लङ्गिभूतासु गीर्षु विशेषं नावधारयन्ति, तेषामयं दोषः न तु लिङ्गस्य।
(तत्त्वसंग्रहपञ्जकि, का. सं. - 1517)

7. विवक्षायां च गम्यायां विस्पष्टैव त्रिरूपता।
पुंसि धर्मिणि सा साध्या कार्येण वचसा यतः।। (तत्त्वसंग्रहः, का. सं. - 1520)

8. आप्तवादाविसंवादसामान्यादनुमानता। (प्रमाणवार्तिकम्- 3.217)

9.अर्थज्ञापनहेतुर्भि संकेतः पुरुषाश्रयः। (प्रमाणवार्तिकम्- 3.227)

10. बौद्धदर्शन में प्रमाणमीमांसा, पृ. सं. - 99

11. प्रमाणसमुच्चय, 5-1, (तत्त्वसंग्रहपञ्जकि, का. सं. - 529) (स्वार्थमन्यापोहेन भाषते)

12. तत्र केचिद् बौद्धाः परिहारमाहुः- न खल्वपोह्यभेदाद्, आधारभेदाद् वा अपोहानां भेदः,
वासनाभेदाद् भेदः सद्रूपता चापोहानां भविष्यति। (तत्त्वसंग्रहपञ्जकि, का. सं. - 959)

13. तथापि द्विविधोऽपोहः पर्युदासनिषेधतः।
द्विविधः पर्युदासोऽपि बुद्ध्यात्मार्थात्मभेदतः।। (तत्त्वसंग्रहः, का. सं. - 1003)

14. यज्ज्ञाने भात्यर्थप्रतिबिम्बकम्। (तत्त्वसंग्रहः, का. सं. - 1005)

15. प्रसज्यप्रतिषेश्च गौरगौर्न भवत्ययम्।
अतिविस्पष्ट एवायमन्यापोहो{वगम्यते।। (तत्त्वसंग्रहः, का. सं. - 1009)

16. तत्रयं प्रथमः शब्दैरपोहः प्रतिपाद्यते।
बाह्यार्थाध्यवसायिन्या बुद्धेः शब्दात् समुद्भवात्।। (तत्त्वसंग्रहः, का. सं. - 1011)
तद्रूपप्रतिबिम्बस्य धियः शब्दाच्य जन्मनि।
वाच्यवाचकभावोऽयं जातो हेतुफलात्मकः।।(तत्त्वसंग्रहः, का-सं--1012)

17. एवं तावत् प्रतिबिम्बलक्षणोऽपोहः साक्षाच्छब्दैरूपजन्यमानत्वात् मुख्यः शब्दार्थ इति।
(तत्त्वसंग्रहपञ्जकि, का. सं. - 1012)

18. तत्त्वसंग्रहपञ्जकि, का. सं. -1012

19. तत्त्वसंग्रहपञ्जकि, का. सं. - 1013-1014

20. बौद्धतर्कभाषा, पृ. सं. - 16-17 (दृष्टव्यः, तत्त्वसंग्रहपञ्जकि, का. सं.- 1542-1585)

21. क्षपाभोजनसम्बन्धी पुमानिष्टः प्रतीयते ।
दिवाभोजनवैकल्यपीनत्वेन तदन्यवत् ।।
भोजने सति पीनत्वमन्वयव्यतिरेकतः ।

निश्चितं तेन सम्बद्धाद् वस्तुनो वस्तुतो गतिः ।। तत्त्वसंग्रहः, का. सं. - 1622-1623

22. तत्त्वसंग्रहपञ्जकिाः, का. सं. - 1679-1682
23. बौद्धदर्शन में प्रमाण मीमांसा- पृ. सं. - 98
24. बौद्धतर्कभाषा, पृ. सं. 18, 19
25. तत्त्वसंग्रहः, का. सं. - 1698
26. ऐतिह्यप्रतिभादीनां भूयसा व्यभिचारिता ।
    नैवेदृशां प्रमाणत्वं घटतेऽतिप्रसङ्गतः ।। तत्त्वसंग्रहः, का. सं. - 1699, पञ्जकिा च।

**सहायकग्रन्थाः –**

1. तत्त्वसंग्रहः (भाग-1 एवं भाग-2), आचार्यशान्तरक्षितः, स्वामिद्वारिकादासशास्त्री, वाराणसी-1981 एवं 1982
2. प्रमाणवार्तिकम्, आचार्यधर्मकीर्तिः, चौखम्बा विद्याभवन, वाराणसी, 2005
3. बौद्धतर्कभाषा, मोक्षाकरगुप्त, प्राच्य प्रकाशन, वाराणसी-1969
4. बौद्धदर्शन में प्रमाणमीमांसा,